गावो विश्वस्य मातरः !

● चारुदत्तः

गावो विश्वस्य मातरः !

कस्य वा भारतीयस्य एतस्मिन् वेदवाक्ये आदरः न स्यात् ? अत एव प्रातः उत्थाय गां नमस्करोति भारतीयः –

सर्वकामदुघे देवि सर्वतीर्थाभिषेचिनि !
पावनि सुरभि श्रेष्ठे देवि तुभ्यं नमो नमः ।।

इति ।

विश्वमातरः एताः गावः इदानीं पत्रिका – दूरदर्शनादि वार्तामाध्यमेषु प्रमुखं स्थानम् अलङ्कुर्वत्यः सन्ति । यतः ब्रिटन् देशे बृहत्तमः 'गोमारणहोमः' आरब्धः अस्ति ! केषुचित् एव दिनेषु तस्मिन् देशे विद्यमानानां ११० लक्षधेनूनां मारणं प्रचलिष्यति । प्रतिसप्ताहं १५,००० धेनूनाम् मारणकार्यम् आरब्धम् अस्ति । धेनुमारणस्य एषः कार्यक्रमः दूरदर्शनेन प्रदर्श्यमाणः अपि अस्ति ।

एतावता महता प्रमाणेन क्रियमाणायाः गोहत्यायाः कारणं किं वा स्यात् ? किम् अपराद्धं ताभिः विश्वमातृभिः ? कारणम् एतदेव यत् ताः सर्वाः धेनवः उन्मत्ताः ! उन्मत्ताश्च ताः अन्येषु अपि उन्मादं जनयन्ति इति ज्ञातवद्भिः बुद्धिमद्भिः मनुष्यैः तन्निवारणाय अनुष्ठीयमानः अस्ति एषः यज्ञः।

आरब्धः मारणहोमः

गोमांसभक्षणम् अनेकेषु भारतीयेषु जुगुप्सां जनयेत् इति तु यद्यपि सत्यमेव, तथापि भारतेऽपि गोमांसभक्षकाः अनेके सन्ति इत्यपि सत्यमेव । गोमांसम् उत्तमं स्वादिष्टम् आहारं मन्यमानः पाश्चात्यसमाजः तद्भक्षणे अतीव रुचिं धारयति । अतः पाश्चात्यानाम् आहारे प्रमुखस्थानम् आवहति गोमांसम् । ब्रिटन्तः यूरोपीयदेशेभ्यः प्रतिमासं निर्यातरूपेण प्रेष्यमाणस्य गोमांसस्य प्रमाणं न स्वल्पम् । परन्तु प्रकृतं 'ब्रिटन् देशे स्थिताः गावः उन्मादग्रस्ताः' इति वार्ता सर्वत्र प्रसृता अस्ति इति कारणतः ततः आयातरूपेण गाः प्राप्तुं न कोऽपि देशः इच्छति । गोमांसक्रेतारः एव न सन्ति चेत् गोस्वामिभिः किं वा कर्तव्यम् ? अन्यच्च उन्मादग्रस्तानां धेनूनां मांसं यः खादति सोऽपि जनः उन्मत्तः सन् अल्पेनैव कालेन मरणं प्राप्स्यति इति वार्तां ज्ञात्वापि पुनः गोमांसभक्षणं कर्तुं को वा उत्सहेत ? अतः एव निरुपयोगिनीनाम् उन्मादग्रस्तानां तासां धेनूनां मारणमेव शरणम् इति निश्चितं ब्रिटन्-शासनेन । आरब्धः एव मारणहोमः !

क्षीरसम्पत्तिवर्धनाय (?)

१९८० तमदशकस्य आरम्भे ब्रिटन्-देशे धेनूनां 'क्षीरसम्पत्तिवर्धनाय' नूतनः कश्चन आहारः तत्रत्यैः अन्विष्टः । परन्तु कः सः नूतनः आहारः ? सः आसीत् दूषितेन अजमांसेन निर्मितः कश्चन कृतकः आहारः । तस्य आहारस्य सेवनेन धेनवः द्विगुणितं त्रिगुणितं वा दुग्धं दातुं समर्थाः अभवन् ।

परन्तु गच्छता कालेन एतस्य विषमफलरूपेण धेनुषु उन्मादः दृष्टिगोचरः जातः । एतस्य रोगस्य नाम बोबैन् स्पाञ्जिफार्म् एन्सेफालोपथि (बि.एम्.इ.)

आगामिषु केषुचित् एव दिनेषु ब्रिटन्देशे ११० लक्षधेनूनां मारणं प्रचलिष्यति ! एतस्याः दारुणगोहत्यायाः कारणं किम् ?

इति । एतद्रोगग्रस्ताः धेनवः फेनं वमन्त्यः, पाददौर्बल्यम् अनुभवन्त्यः मरणं प्राप्नुवन्ति स्म । गोमांसभक्षकेषु अपि एतस्य रोगस्य प्रसारः भवेत् इति वैज्ञानिकैः सूचना दत्ता । परन्तु 'तादृशः कोऽपि अपायः न भविष्यति' इति शासनेन निर्णयः श्रावितः ! न केवलं तावत्, गोमांसनिर्मितं ह्यांबर्गर्-नामकं खाद्यं स्वपुत्र्या खादयन्तम् आत्मानं दूरदर्शनेन प्रदर्शयता कृषिसचिवेन एतत् प्रमाणीकृत्य जनेषु विश्वासोत्पादनं कर्तुं प्रयत्नः कृतः ।

भवितव्यं भवत्येव

परन्तु अनन्तरवर्षे एव गोमांसभक्षकेषु जनेषु केषुचित् विचित्रः नूतनः रोगः दृष्टः । एकस्मिन् एव वर्षे ३० ब्रिटिष्प्रजाः एतेन रोगेण दिवङ्गताः । एतद्रोगग्रस्ताः आरम्भे आयासम् अनुभवन्ति । अनन्तरं भ्रमाधीनाः भवन्ति । अन्ते च साक्षात् उन्मत्ताः इव व्यवहरन्तः मासत्रयाभ्यन्तरे मृताः भवन्ति । एतस्य रोगस्य क्रुझ्फेल्ड् जाकोब्स् डिसिस् (सि जे डी) इति वैज्ञानिकैः नामकरणं कृतम् । एषः रोगः तथैव भयङ्करः यथा एड्स् । रोगस्य लक्षणानि कानि इति अवगन्तुम् एव वैज्ञानिकाः न शक्ताः, किं पुनः औषधान्वेषणे ?

'रोगग्रस्तानां सर्वासाम् अपि धेनूनां मारणेन, तासां शरीराणाम् अग्निना दहनेन केवलम् एतस्य रोगस्य नियन्त्रणं शक्यम्' इति मत्वा ब्रिटिष्-शासनेन इदानीं तदर्थं व्यवस्था कृता अस्ति । प्रतिसप्ताहं १५ सहस्र-धेनूनां

(३१ पृष्ठं पश्यन्तु)

मारणम्, अनन्तरं बृहदाकारकेषु अग्न्यागारेषु तासां शरीराणां दहनं च आरब्धमेव । एतस्य धेनुमारणहोमस्य, तन्निमित्तं गोपालकेभ्यः दातव्यस्य जीवविमामूल्यस्य च निमित्तं ब्रिटष्-शासनेन व्ययितव्यं धनं २० शतकोटि पौण्ड् - परिमितम् !

अन्ताराष्ट्रियस्तरे परिणामः

ब्रिटन्मध्ये प्रचलतः एतस्य धेनुमारणहोमस्य प्रतिध्वनिः अन्ताराष्ट्रियस्तरे अपि जातः । ये ये देशाः ब्रिटन्तः गोमांसं निर्यातरूपेण आनाययन्ति स्म ते सर्वेऽपि इदानीं तस्य निषेधः करणीयः इति निर्णीतवन्तः सन्ति। नेदर्लेण्ड् देशः पूर्वं स्वेन ब्रिटन्तः आनायितान् ६४,००० गोवत्सान् मारयितुं सन्नद्धः अस्ति । बेल्जियं देशीयैः कृषिकैः 'दृष्टाः सर्वाः अपि ब्रिटिष् धेनवः गोलकास्त्रेण मारणीयाः' इति अनुरोधः क्रियमाणः अस्ति । ब्रिटन् देशस्य निर्यातव्यवहारस्य प्रमाणे महती न्यूनता जाता अस्ति ।

दुष्कृत्यस्य फलम्

सर्वस्याः एतस्याः अनर्थपरम्परायाः कारणं किम् - इति जिज्ञासा आरब्धा अस्ति इदानीं वैज्ञानिकानां बुद्धिजीविनां च समूहे । ब्रिटन्-निवासी भारताभिजनः वैद्यः हर्ष नारङ्गः अभिप्रैति यत् 'दुराशा पीडितस्य मनुष्यस्य दुष्कृत्यस्य फलम् इदम् । यतः पूर्वं तु धेनवः तृणं खादन्त्यः सुखेन आसन् । तासाम् आहारे अजमांसं योजयता मनुष्येण सस्याहारिण्यः धेनवः मांसाहारिण्यः कृताः । एतस्य पापस्य फलं मनुकुलेन अनुभोक्तव्यम् एव' इति ।

मनुकुलस्य पाठः

समग्रम् एतत् प्रकरणम् अस्मान् किं पाठयति ? ३० वर्षेभ्यः पूर्वमेव तत्त्वज्ञानिना बर्ट्रेण्ड्रसलेन उक्तम् आसीत् यत् 'वाणिज्यैक-दृष्टिभिः स्वार्थिभिः राजनेतृभिः संवर्ध्यमानं विज्ञानं मनुकुलस्य मारकं भविष्यति' इति । वैज्ञानिकैः जैविकविज्ञानक्षेत्रे क्रियमाणाः एतादृशाः नूतनाः आविष्काराः रसलस्य एतम् अभिप्रायमेव प्रमाणीकुर्वन्ति ननु ? नैतिकप्रज्ञां विहाय प्रकृतिनियमान् विरुध्य क्रियमाणाः वैज्ञानिकाः आविष्काराः मनुकुलं कथम् अपायगर्ते पातयन्ति इत्यस्य दृष्टान्तः खलु एतत् प्रकरणम् ।